# विविधप्रश्नावलिः - १

प्रश्नः - १ प्रश्नानां उत्तरं लिखत –

(क) रुचिकरा भाषा का अस्ति?

(ख) वयं नेत्राभ्यां किं कुर्मः?

(ग) मोहनः रात्रौ कदा शयनं करोति?

(घ) वृक्षः कैः शोभते?

(ङ) पृथिव्याः भूषणं किम् अस्ति?

(च) रज्जुनिर्माणं कथं भवति?

प्रश्नः - २ कोष्ठकशब्दैः अधोलिखितप्रश्नानां उत्तरं लिखत –

(क) कः पठति?

(ख) कौ धावतः?

(ग) के रक्षन्ति?

(घ) के कूजतः?

(ङ) का प्रवहति?

(च) काः भ्रमन्ति?

| |
|---|
| एतौ, ते, चटके |
| सः, ताः, नदी |

प्रश्नः - ३ श्लोकान् पूरयत–

(क) विदेशेषु धनं विद्या, ...............।
............... शीलं सर्वत्र वै धनम्॥

(ख) विद्वत्वं च नृपत्वं च, ...............।
..............., विद्वान् सर्वत्र पूज्यते॥

(ग) विद्या ददाति विनयं, ...............।
पात्रत्वाद् धनमाप्नोति...............॥

(घ) अलसस्य कुतो विद्या, ...............।
अधनस्य कुतो मित्रम्, ...............॥

प्रश्नः - ४ उचितशब्देन रिक्तस्थानं पूरयत–

(क) चतस्रः .......................। (बालिकाः/बालकाः/गृहाणि)

(ख) त्रीणि .......................। (छात्राः/फलानि/मयूराः)

(ग) अष्ट .......................। (पत्रम्/लते/भवनानि)

प्रश्नः - ५ उचितं मेलयत–

| | (अ) | (ब) |
|---|---|---|
| (क) | एका | अश्वौ |
| (ख) | द्वौ | मालाः |
| (ग) | तिस्रः | फलम् |
| (घ) | एकम् | बालिका |

प्रश्नः - ६ निम्नलिखितशब्दानां तृतीयाविभक्तेः रूपाणि लिखत –

(क) घट ....................।

(ख) हस्त ....................।

(ग) नासिका ....................।

(घ) शाखा ....................।

(ङ) पुष्प ....................।

(च) चक्र ....................।

प्रश्नः - ७ उचितं मेलयत –

| | (अ) | (ब) |
|---|---|---|
| (क) | सः शिक्षकः | खादन्ति |
| (ख) | एषा शिक्षिका | भ्रमन्ति |
| (ग) | के छात्रे | लिखतः |
| (घ) | कानि पत्राणि | उपविशति |
| (ङ) | ते बालकाः | गच्छति |
| (च) | एतत् चक्रं | चलन्ति |
| (छ) | काः छात्राः | पतन्ति |
| (ज) | ताः बालिकाः | हसतः |
| (झ) | एतौ छात्रौ | भ्रमति |

प्रश्नः - ८ उचितं मेलयत –

| | (अ) | (ब) |
|---|---|---|
| (क) | अहम् | पचन्ति |
| (ख) | त्वम् | खादति |
| (ग) | आवाम् | लिखतः |
| (घ) | युवाम् | चलथ |
| (ङ) | वयम् | पठसि |
| (च) | यूयम् | पश्यथः |
| (छ) | एषः | लिखावः |
| (ज) | तौ | पिबामः |
| (झ) | ते | गच्छामि |

प्रश्नः - ९ अन्वयपूर्तिं कुरुत –

(क) कुरूपाणां ................... विद्या, निर्धनानां ................... तथा, निर्बलानां बलं ......................, ...................... प्रयत्नतः।

(ख) विदेशेषु ...................... धनं, व्यसनेषु मतिः ................., परलोके ...................... धनं, .................. सर्वत्र वै धनम्।

प्रश्नः - १० वर्णमालानुसारं क्रमेण स्थापयत –

ऊर्णा, बकः, औषधम्, हलम्, सरः

मयूरः रथः आम्रम्, घटः कमलम्।